# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–अक्टूबर–२०१९

| कक्षा –शास्त्रिद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम् — ६ | गुणाः – ७० |
|---|---|---|
| विषयः – साहित्यम् | (C.C.- 2.3.6. Old ) | समयः –८.०० तः ११.०० |
| दिनाङ्कः – १५/१०/२०१९ | सन्दर्भग्रन्थः – वेणीसंहार — नाटकम् | |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेषु द्वयोः श्लोकयोः व्याख्या विधेया।** १०

(१) मध्नामि कौरवशतं समरे न कोपाद् दूशासनस्य रुधिरं न पिबाम्युरस्तः।
सञ्चूर्णयामि गदया न सुयोधनोरू सिन्धं करोतु भवतां नृपतिः पणेन॥

(२) चञ्चदभुजक्षमितचण्डगदाऽभिधातसञ्चर्णितोरुयुगलस्य सुयोधनस्य।
स्त्यानाऽवनद्वेधनशोणितेशोणपाणिसत्तंसदिष्यति वञ्चांस्तवदेविः भीमः॥

(३) आत्मारामा विहितरतयो निर्विकल्पे समाधौ
शानोत्सेकाद्विघटिततमोग्रन्थयः सत्वनिष्ठाः।
यं वीक्षन्ते कमपि तमसां ज्योतिषां वा परस्तात्
तं मोहान्धः कथमयममुं वेत्तुदवं पुराणम्॥

**प्रश्नः २** वेणीसंहारनाटकरचयितुः परिचयं लिखत। १०

**अथवा**

प्रथमाङ्कस्य सारांश लिखत।

**द्वितीयान्वितिः**

**प्रश्नः ३ निम्नेषु श्लोकद्वयस्य सप्रसङ्गं व्याख्या कार्या।** १०

(१) सङ् भृत्यगणं सबान्धवं सहमित्रं ससुतं सहानुजम्।
स्वबलेन निहन्ति संयुगे नचिरात्पाण्डुसुतः सुयोधनम्॥

(२) इयमस्यदुपाश्यैकचित्तामनसा प्रेमनिबद्धमत्सरेण।
नियतं कुपितातिबल्लभत्वान् स्वयमुत्प्रेक्ष्य ममापेराधलेशम्॥

(३) ग्रहाणां चरितं स्वप्नोऽनिमित्तान्युपयाचितम्।
फलन्ति काकतालीयं तेभ्येः प्राज्ञा न बिभ्यति॥

**प्रश्नः ४** द्वितीयाङ्कस्य सारांशं लिखन्तु। १०

**अथवा**

वेणीसंहारे प्रधानः कः रसः ? तत् सोदाहरणं विवेचयन्तु।

## तृतीयान्विति:

**प्रश्न: ५ निम्नेषु श्लोकद्वयस्य सप्रसंङ्ग व्याख्या विधेया।** १०

(१) एतेऽपि तस्य कुपितस्य महास्त्रपाणे: किं धूर्जटेरिवतुलामुपयान्ति सङ्ख्ये।
शोकोपरुद्धहृदयेन यदातु शस्त्रं त्यक्तं तदाऽस्यविहितं रिपुणाऽतिधारम्॥

(२) श्रुत्वा वध मम मृषाा सुतवत्सलेन तात ! त्वया सह शरैरसवो विमुक्ता:।
जीवाम्यहं पुनरहोभवताविनाऽपि क्रूरेऽपि तन्मयिमुधा तव पक्षपात:॥

(३) आजन्मनो न वितथं भवता किलोक्तं न द्वेषि यजज्जनमतस्त्वमजाशत्रु:।
ताते गुरौ द्विजवरे मम भाग्य दोषात् सर्वं तदेकपद एव कथं निरस्तम्॥

**प्रश्न: ६** दुर्योधनाश्वत्थाम्नो: चरित्रचित्रणं लिखत। १०

**अथवा**

तृतीयाङ्कस्य सारं लिखत।

## संयुक्तान्विति:

**प्रश्न: ७ लघूत्तराणि लिखत। (दशानाम्)** १०

(१) वेणीसंहार नाटकस्य लेखक: क: ?
(२) भट्टनारायणस्य मूलं स्थानं किमासीत् ?
(३) भट्टनारायण: कस्मिन् प्रदेशे स्ववसतिं चकार ?
(४) भट्टनारायणस्य मातापित्रो: किंनामासीत् ?
(५) प्रथमाङ्के कति श्लोका: ?
(६) वेणीसंहारस्य मुख्य नायक: क: ?
(७) वेणीसंहारस्य प्रतिनायक: क: ?
(८) अर्जुनस्य सखा सारथिश्च क: ?
(९) दुर्योधनपत्न्या: नाम किम् ?
(१०) द्रोणाचार्यस्य श्यालक: क: ?
(११) द्रोणाचार्यस्य पुत्र: क: ?
(१२) धृतराष्ट्रस्य सारथि: क: ?
(१३) भट्टनारायण: कस्य देवस्य भक्त: प्रतीयते ?
(१४) गोविन्देन सुदर्शनस्य निशितं धारापथं प्रापित: इति कस्योक्ति: ?
(१५) वेणीसंहार नाटकस्य नायिका का विद्यते ?

----oooo----